३"यस्मात् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः। तस्मादेवोच्यते विष्णुर्विशधातोः प्रवेशनात्" इत्युक्तेः विश-प्रवेशे नु प्रत्यो० इत्यपि बोध्यम्। २वह्नौ ३शुद्धे ४वसुदेवतायां धनिष्ठः। ५धर्मशास्त्रकारके मुनिभेदे च "मन्वत्रिविष्णुहारीते"ति याज्ञ०। ६तद्दैवते श्रवणनक्षत्रे ज्यो०त०।

**विष्णुकन्द** पु० विष्णुप्रियः कन्दः शा०त०। मूलभेदे राजनि०

**विष्णुक्रान्ता** स्त्री ३त० विष्णुस्तद्वर्णः क्रान्तो वा यया। अपराजितायाम् अमरः तस्याः विष्णुतुल्यवर्णत्वात् विष्णुपरित्यक्तत्वाच्च तथात्वम्।

**विष्णुगुप्त** पु० १चाणक्ये मुनौ स्वयमेव शत्रुशासनत्वेन पक्षिलत्वेन प्रसिद्धः त्रिका०। ३त०। विष्णुना गुप्ते कुन्यादौ २देवादौ ३कन्दभेदे राजनि०।

**विष्णुतैल** न० वैद्यकप्रसिद्धे तैलभेदे तच्च द्विविधं स्वल्पवृहद्भेदात् तत्तैलपाकप्रकारः भैषज्यरत्ना० उक्तो यथा तत्र स्वल्पविष्णुतैलम् "शालपर्णी पृश्निपर्णी बलागोरक्षतण्डुलाः। एरण्डस्य च मूलानि वृहत्योः पूतिकस्य च। शतावरी सहचरी पचेदेतैः पलोन्मितैः। तैलप्रस्थं पयोदत्त्वा गव्यं वाऽऽजं चतुर्गुणम्। अस्य तैलस्य पक्वस्य शृणु वीर्य्यमतः परम्। वातार्त्तो नरनागाश्च पीत्वा दृढतनुत्वचः। हृत्पार्श्वशूले वाताख्ये गलगण्डेऽर्दिते क्षये। शर्करास्मरिपाण्डुत्वकामलाखाविभेदके। क्षीणेन्द्रियेऽन्त्रवृद्धौ च जराजर्जरिते हितम्। स्त्रीणामश्वतरीणाञ्च गर्भस्थितिकरं परम्। एतदङ्गरं तैलं विष्णुना परिकीर्त्तितम्"। तण्डुलः गोरक्षतण्डुलः। वृहत्योर्वृहतीकण्टकार्य्योः। पूतिकं नाटाकरञ्जः। सहचरी भिण्टी। अत्र क्वाथान्तराभावात् क्षीरस्य चतुर्गुणं जलं कश्चिद्दाति। "स्वरसक्षीरमाङ्गल्यैः पाको यत्रेरितः क्वचित्। जलं चतुर्गुणं तत्र वीर्य्याधानार्थकारयेत्" इति परिभाषाबलात्। क्वचिदिति पाठात् क्वाथान्तररहिते केवलक्षीरादिसहिततैलादिपाके ज्ञातव्यं न तु सर्वत्र। "एलाचन्दनकुङ्कुमागुरुमुराकक्कोल मांसी शटी श्रीवासच्छदपर्ण्यपर्णशशभृत्त्वग्वाध्वजोशीरकम्। कस्तूरीनखपूतिशैलजलमुङ्मेथीलवङ्गादिकम्। अन्यद्द्रव्यमिदं प्रदेयमखिलं श्रीविष्णुतैलादिषु"। अथ वृहद्विष्णुतैलम् "जलधरमश्वगन्धा जीवकर्षभकौ शटी। काकोली क्षीरकाकोली जीवन्ती मधुयष्टिका। मधूरिका देवदारु पद्मकाष्ठञ्च सैन्धवम्। मांसी चैला त्वचं कुष्ठं रक्तचन्दनशैलजम्। मञ्जिष्ठा मृगनाभिश्च श्वेतचन्दनकुङ्कुमम्। पर्णी कुन्दुरु खोटिश्च ग्रन्थिकञ्च नखी तथा। एतेषां पालिकैर्भागैस्तैलस्यापि तथाढकम्। शतावरी रसतमं दुग्धञ्चापि समं भवेत्। विष्णुतैलवरं श्रेष्ठं सर्ववातविकारनुत्। ऊर्द्ध्ववाते ह्यधोवाते अङ्गविग्रह एव च। शिरोमध्यगता ये च मन्यास्तम्भे गलग्रहे। यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला। ये वातप्रभवारोगा ये च पित्तसमुद्भवाः। सर्वांस्तान्नाशयत्याशु सूर्य्यस्तम इवोदितः"।

**विष्णुदेवत(त्य)** त्रि० विष्णुर्दैवत(त्य) यस्य। विष्णुदेवताके द्रव्यादौ "शृण्वन्तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः!। तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदेवतम्" शु० त० विष्णु०। २श्रवणनक्षत्रे च।

**विष्णुधर्म्म** पु० विष्णूपासनायोग्यो धर्म्मः शाक०। विष्णूपासनोचिते १नियमभेदे उपचारात् तत्प्रतिपादके २ग्रन्थे च

**विष्णुधर्म्मोत्तर** न० विष्णुधर्म उत्तरः प्रधानः वर्ण्यत्वेन यस्य। संहिताभेदे।

**विष्णुपद** न० विष्णोः पदमिव व्यापकत्वात्। १आकाशे अमरः। ६त०। २क्षीरार्णवे मेदि०। ३पद्मे च हेमच०। ४विष्णोश्चरणे कर्म०। ५विष्णुरूपस्थाने च "तद्विष्णोः परमं पदम्" ऋ० विष्णुसूक्तम्।

**विष्णुपदी** स्त्री० विष्णुपदं कारणत्वेनास्त्यस्याः अच् गौरा० ङीष्। १गङ्गायाम् "निर्गता विष्णुपादाब्जात् तेन विष्णुपदी स्मृता" ब्रह्मवै० प्र० ८ अ०। २वृषसिंहवृश्चिककुम्भराशौ रवेः संक्रान्तौ च। "वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी स्मृता" "पुण्यायां विष्णुपद्याञ्च प्राक्पश्चादपि षोड़श" ज्यो०त०। "अयने कोटिगुणितं लक्षं विष्णुपदीषु च" ति०त० "तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः। नैरन्तर्यात् तु संक्रान्तेर्ज्ञेयं विष्णुपदीद्वयम्" सू०सि०। "तदन्तरेषु विषुवायनान्तरालेषु। अन्तरालानां चतुःस्थाने सद्भावात् बहुवचनम्। संक्रान्तिद्वितयं द्वितयं पुनाराश्यादिभागे पञ्चाशामाक्रमणं वारद्वयं भवति तदन्तराले राश्यादिभागौ द्वौ भवत इत्यर्थः। तथा हि मेषाख्यविषुवकर्काख्यायनयोरन्तराले वृषमिथुनयोरादौ। कर्कतुलयोरन्तराले सिंहकन्ययोरादौ। तुलामकरयोरन्तराले वृश्चिकधनुषोरादौ। मकरमेषयोरन्तराले कुम्भमीनयोरादौ इति। एवं विषुवानन्तरं संक्रमणद्वयमनन्तरमयनं तदनन्तरं संक्रान्तिद्वयं तदनन्तरं विषुवमनन्तरं संक्रान्तिद्वयमनन्तरमयनमित्यादि। पौनःपुन्येन